# 2021

## SANSKRIT — GENERAL

**Paper : GE/CC-1**

**(Sanskrit Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Marks : 20)**

**Unit – I**

1. (क) अधोलिखितयोः कस्य***चिदेकस्य*** मातृभाषया अनुवादः कार्यः। 5

(अ) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

(आ) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः॥
तितीर्षुं दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(ख) अधोलिखितयोः कस्य***चिदेकस्य*** सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्या। 5

(अ) अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्यैवास्ति मे गतिः॥

(आ) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा॥

**Unit – II**

2. अधोलिखितेषु संक्षेपेण यथामति ***दशप्रश्नानाम्*** उत्तरं (एकं विहाय सर्वेषाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्) दीयताम्। 1×10

(क) 'रघुवंशम्' इति महाकाव्यस्य मङ्गलश्लोके कयोः स्तुतिरस्ति?

(ख) कविः रघुवंशस्य वर्णनं कथं दुष्करं मन्यते?

(ग) रघुवंशमिति महाकाव्यस्य प्रथमसर्गस्य नाम किम्?

(घ) दिलीपः कथं प्रजाभ्यः करं गृह्णाति स्म?

(ङ) रविः कथं पृथिवीरसं स्वीकरोति?

(च) इक्ष्वाकुः कः आसीत्?

(छ) दिलीपस्य वंशः केन नाम्ना परिचितः?

(ज) कः आसीत् महीक्षितामाद्यः?

(झ) दिलीपस्य गुणद्वयं लिख्यताम्।

(ञ) किमर्थं दिलीपेन दारपरिग्रहः कृतः?

(ट) दिलीपस्य कार्यारम्भः कथं ज्ञायते?

(ठ) जरसा विना दिलीपस्य वृद्धत्वं कथं सिद्धम्?

**Section – B**

**(Marks : 20)**

**Unit – I**

**3.** शिशुपालवधम् इति महाकाव्यस्य प्रथमसर्गम् अनुसृत्य देवर्षेः नारदस्य अलौकिकम् अवतरणदृश्यं वर्ण्यताम्। 10

***अथवा,***

"तावद्भा भारवेर्भाति यावन्माघस्य नोदयः"– इत्युक्तेः याथार्थ्यं पर्यालोच्यताम्। 10

**Unit – II**

**4.** अधोलिखितेषु यथामति ***पञ्चप्रश्नानाम्*** उत्तरं संस्कृतभाषया देवनागरलिप्या च प्रदेयम्। 2×5

(क) शिशुपालवधमिति महाकाव्यस्य रचयिता कः?

(ख) शिशुपालवधमहाकाव्यस्य उत्सः कः अस्ति?

(ग) कुत्रासीत् वासुदेवस्य निवासस्थानम्?

(घ) शिशुपालवधमहाकाव्यस्य प्रसिद्धः टीकाकारः कः? तस्य टीकायाः नाम लिख्यताम्।

(ङ) मनीषिणः केषां गृहं गन्तुं नाभिलषन्ति?

(च) जगतः आदिपुरुषः कः?

(छ) नारदस्य उपवीतं काभिः निर्मितम्?

## Section – C
**(Marks : 10)**
**Unit – II**

**5.** (क) अधोलिखितयोः कस्यापि ***एकस्य*** श्लोकस्य सप्रसङ्गं व्याख्या कार्या (संस्कृतभाषया देवनागरलिप्या च)। 5

(अ) अम्भोजिनीवनविहारविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः।।

(आ) येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भूवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति।।

(ख) निम्नलिखितयोः ***कस्यैकस्य*** मातृभाषया अनुवादं कुरु। 5

(अ) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः।।

(आ) अधिगतपरमार्थान्पण्डितान्मावमंस्था–
स्तृणमपि लघु लक्ष्मीनैव तान्संरुणद्धि।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम्।।

## Section – D
**(Marks : 15)**
**Unit – II**

**6.** अधोलिखितेषु किमपि ***विषयत्रयम***वलम्ब्य संक्षिप्ता टीका कार्या। 5×3

(क) सौन्दरनन्दम्,

(ख) कुमारसम्भवम्,

(ग) भारविः,

(घ) नैषधचरितम्,

(ङ) अमरुशतकम्।